शास्त्रीयग्रन्थमाला-८

पाणिनीयाष्टाध्याय्या

# नव्यसिद्धान्तकौमुदी

इत्यपरनामविभूषितं

# पौष्पं प्रक्रियाविज्ञानम्

तत्र षष्ठो भागः

## इडागमनिर्णयः

प्रणेत्री सम्पादयित्री च

दीक्षितपुष्पा

योऽनूचानः स नो महान्।

राष्ट्रियसंस्कृतसंस्थानम्

राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

नवदेहली

शास्त्रीयग्रन्थमाला-८

पाणिनीयाष्टाध्याय्या

# नव्यसिद्धान्तकौमुदी

इत्यपरनामविभूषितं

## पौष्पं प्रक्रियाविज्ञानम्

तत्र षष्ठो भागः

## इडागमनिर्णयः

प्रणेत्री सम्पादयित्री च

**दीक्षितपुष्पा**

राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

नवदेहली

# अनुक्रमः


| | | |
|---|---|---|
| १. | अष्टाध्याय्या इडागमप्रकरणम् | १ |
| २. | सेट्-अनिट्-प्रत्यया: | ३ |
| ३. | सेट्-अनिट्-धातव: | ४ |
| ३. | अनिट्-अजन्तधातव: | ५ |
| ४. | अनिट्-हलन्तधातव: | ६ |
| ५. | वेट्-धातव: | ९ |
| ६. | सेट्-धातव: | १० |
| ७. | लिट्-प्रत्ययानाम्-इडागमविशेष: | १० |
| ८. | क्वसु-प्रत्ययस्य-इडागमविशेष: | १५ |
| ९. | स्य-प्रत्ययस्य-इडागमविशेष: | १७ |
| १०. | क्से-से-सेन्-सिप्-सिच्-प्रत्ययानाम्-इडागमविशेष: | १९ |
| ११. | सिच्-प्रत्ययस्य-इडागमविशेष: | १९ |
| १२. | सन्-प्रत्ययस्य-इडागमविशेष: | १९ |
| १३. | सीयुट्प्रत्ययस्य-इडागमविशेष: | २१ |
| १४. | तास्-प्रत्ययस्य इडागमविशेष: | २२ |
| १५. | तृच्-प्रत्ययस्य इडागमविशेष: | २२ |
| १६. | तृच्-तुमुन्-तव्य-तव्यत्-तृन्-तवै-तवेन्-तोसुन्-त्वन्-तवेङ्-क्तिन्-प्रत्ययानाम्-इडागमविशेष: | २२ |
| १७. | क्तिन्-प्रत्ययस्य इडागमविशेष: | २३ |
| १८. | क्त्वाप्रत्ययस्य-इडागमविशेष: | २३ |
| १९. | निष्ठाप्रत्ययस्य-इडागमविशेष: | २७ |


❀❀❀

अद् + ता = अत्ता । पद् + ता = पत्ता । शद् + ता = शत्ता । सद् + ता = सत्ता । हद् + ता = हत्ता । खिद् + ता = खेत्ता । छिद् + ता = छेत्ता । भिद् + ता = भेत्ता। विद् + ता = वेत्ता । विद् + ता = वेत्ता । स्विद् + ता = स्वेत्ता । क्षुद् + ता = क्षोत्ता । तुद् + ता = तोत्ता । नुद् + ता = नोत्ता । स्कन्द् + ता = स्कन्त्ता। अतोऽन्ये दकारान्तधातवः सेटः ।

**ध्यातव्यम्** – दिवादिगणस्य 'विद सत्तायाम्', रुधादिगणस्य 'विद विचारणे', इत्येतावनिटौ – वेत्ता। तुदादिगणस्य 'विद्लृ लाभे', अदादिगणस्य च 'विद ज्ञाने', इति सेटौ – वेदिता।

**६. एकाचो धकारान्तधातवः** – एषु व्यध् (प.), सिध् (षिधु संराद्धौ, दिवादेः), क्रुध्, क्षुध्, (प) बुध्, युध्, (आ) रुध्, (रुधिर् आवरणे (उ), अनो रुध कामे (उ) शुध्, राध्, साध्, बन्ध् (प), इति एकादश धकारान्तधातवोऽनिटः ।

व्यध् + ता = व्यद्धा । सिध् + ता = सेद्धा । क्रुध् + ता = क्रोद्धा। क्षुध् + ता = क्षोद्धा । बुध् + ता = बोद्धा। युध् + ता = योद्धा। रुध् + ता = रोद्धा। शुध् + ता = शोद्धा । राध् + ता = राद्धा । साध् + ता = साद्धा। बन्ध् + ता = बन्द्धा। अतोऽन्ये धकारान्तधातवः सेटः।

**ध्यातव्यम्** – भ्वादिगणस्य 'बुधिर् बोधने' सेडस्ति – बोधिता। दिवादिगणस्य 'बुध अवगमने' अनिडस्ति – बोद्धा।

**७. एकाचो नकारान्तधातवः** – एषु मन् ( मन ज्ञाने, दिवादेः(आ) हन् (प), इत्येतौ द्वौ धातू अनिटौ स्तः।

मन् + ता = मन्ता। हन् + ता = हन्ता। अतोऽन्ये नकारान्ताः सेटः।

**८. एकाचः पकारान्तधातवः** – एषु तप् (तप संतापे (प.), तप ऐश्वर्ये, तप दाहे (आ), वप् (उ), शप् (उ), स्वप् (प), क्षिप् (प) (क्षिप प्रेरणे दिवादेः, तुदादेः), तिप् (आ), लिप् (उ), छुप् (प), लुप्लृ (उ), तृप् (दिवादेः प.), दृप् (दिवादेः प.), सृप्, आप्, (प) इति त्रयोदश धातवोऽनिटः सन्ति –

तप् + ता = तप्ता । वप् + ता = वप्ता। शप् + ता = शप्ता। स्वप् + ता = स्वप्ता। क्षिप् + ता = क्षेप्ता। तिप् + ता = तेप्ता। लिप् + ता = लेप्ता। छुप् + ता = छोप्ता। लुप् + ता = लोप्ता। तृप् + ता = तर्प्ता, त्रप्ता। दृप् + ता = दर्प्ता, द्रप्ता। सृप् + ता = सर्प्ता, स्रप्ता। आप् + ता = आप्ता। अतोऽन्ये पकारान्तधातवः सेटः।

**ध्यातव्यम्** – दिवादिगणस्य तृप्, दृप्, एतौ वेटौ। अत्र 'अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्' इति अमागमार्थमत्र पठितौ। तर्पिता, त्रप्ता, तर्प्ता।




## डॉ. पुष्पा दीक्षिता

अध्यक्षा, पाणिनीयशोधसंस्थानम्

बिलासपुरम्


१.७.१९४२ दिनाङ्के जबलपुरनगरस्य प्रख्यातायुर्वेदचिकित्सकात् शास्त्राणां पारदृश्वनः प्राणाचार्यपण्डितसुन्दरलालशुक्लाज्जानकीदेव्यां लब्धजनिः महामहोपाध्यायाचार्या डॉ. पुष्पा दीक्षिता, आचार्यविश्वनाथत्रिपाठिभ्यो व्याकरणमधीत्य मध्य-प्रदेशशासनस्याथ च छत्तीसगढ़प्रदेशशासनस्य महाविद्यालयीयप्राध्यापकपदान्निवृत्ता।

सा च भगवतः पाणिनेर्महत्तमेन तपसा निर्धारितं पाणिनीयाष्टाध्यायीसूत्रक्रमं साक्षात्कृत्य प्रक्रियायाः सर्वथा नवीनं क्रमं प्रक्रियाविज्ञानं च प्रोद्घाटितवती, येन निखिलाष्टाध्यायी त्रिभिर्मासैरधिगता भवतीति नास्ति संशीतिलेशोऽपि।

**प्रकाशितग्रन्थाः -**

१. अष्टाध्यायीसहजबोधः, अष्टसु भागेषु
   (तत्र चत्वारो भागाः प्रकाशिताः)
२. नव्यसिद्धान्तकौमुदी, चतुर्दशसु भागेषु
   (तत्र पञ्च भागाः प्रकाशिताः)
३. तिङन्तकोषः (त्रयो भागाः)
४. कृदन्तकोषः (द्वौ भागौ)
५. तिङ्कृत्कोषः (द्वौ भागौ)
६. लकारसरणिः (चत्वारो भागाः)
७. णिजन्तकोषः
८. सन्नन्तकोषः
९. यङन्तकोषः
१०. यङ्लुगन्तकोषः
११. इडागमः (संस्कृते, राष्ट्रभाषायाञ्च)
१२. पाणिनीयाष्टाध्यायीसूत्रपाठः
    (प्रकरणनिर्देशसमन्वितः)
१३. प्रकियानुसारिपाणिनीयधातुपाठः
१४. शीघ्रबोधव्याकरणम्
१५. पाणिनीयधातुपाठः (सार्थः)
१६. औपदेशिकः पाणिनीयधातुपाठः
    (सार्वधातुकप्रत्ययोपयोगी)
१७. औपदेशिकः पाणिनीयधातुपाठः
    (आर्धधातुकप्रत्ययोपयोगी)
१८. तिङ्कृत्कोषः (द्वौ भागौ)
१९. अग्निशिखा (गीतिकाव्यम्)
२०. शाम्भवी (गीतिकाव्यम्)
२१. अपराजितवधूः (खण्डकाव्यम्)
    अस्य संपादनमनुवादश्च
२२. प्रबुद्धभारतम् (खण्डकाव्यम्)
    अस्य संपादनमनुवादश्च
२३. सौन्दर्यलहरी, अस्याः संपादनम्

**प्रकाश्यग्रन्थाः -**

२४. नव्यसिद्धान्तकौमुदी
    (अवशिष्टा नव भागाः)
२५. अष्टाध्यायीसहजबोधः
    (अवशिष्टाश्चत्वारो भागाः)
२६. परिभाषेन्दुशेखरस्य
    बहुतरपरिभाषाणामन्यथासिद्धिः
    अन्ये च